४६९९

Shri Raghunatha Temple MSS. Library,
JAMMU

No. १३३१ / क

Title शिवाबलिप्रकारः

Author

Extent ४ पत्र Age

Subject तन्त्र

शिवाबलिप्रकारः

नं॰ १३३९

नं० ~~५५~~ ८

५८१

S 799

F 6

गीतावलिप्रकाशः

Complete



श्री-

ॐश्रीगुरवेशिवायैनमः अथशिवाबलिप्रकारः तत्रकु
त्रचिद्दृढःस्थानेश्रीकालीपञ्चस्तवक्रमेणसर्वान्पूजां
यथाविधिविधाय ऐशान्यादिशिमण्डलंकृत्वा सामान्या
र्घ्यप्रोक्षणीपात्रंशुनासंप्रोक्ष्य पीठपूजांतत्रकृत्वा गंधा
क्षतधूपदीपादिनाभ्यर्च्य पृथक्पृथक् कुत्रचिद
ष्टमे कस्मिंश्चिन्मासे कस्मिंश्चिन्मासमत्स्यकुत्रचिन्मुद्गा
कस्मिंश्चित्कृष्णमांसामिषामोदकादिनिक्षिप्य कालीकाली

ति शिवांकालींसमाहूयह्रींश्रीं एहिमहाकालिबलिंगृ
ह्णा २ गृह्णापय २ मदीयेआलयेआगच्छ २ ममकार्यं
साधय २ प्रसादेकुरु २ सर्वसिद्धिंदेहि २ स्वाहा गृह्णा
देविमहाभागेशिवेकालाग्निरूपिणि शुभाशुभफलंव्य
क्तिंब्रूहिगृह्णाबलिंमम इतिमंत्रंत्रिःपठित्वा ततोमत्र
कुत्रचित्समीपस्थेस्थानेस्वात्मानंरहःस्थिताउल्कामुखि
घोररावेगुहाकाननवासिनि कृपाकुरुमहाभागेनमस्तेवं

श्री॰ डिवल्लभे १ संग्रामपीठेशवरिशवमांसप्रमोदिनि पा २
2 हिमां संकटहरेनमस्तेचितिनिवासिनि २ फलमूलाश
नेदेविचंडिकेचंडनादिनि भयेभ्योरक्षमांदेविपशुरू
पेविराविनि ३ शिशुप्रियेशिवामोदेदिकचक्रभ्रमका
रिणि शुभाशुभफलंब्रूहिनमस्तेकालिकाप्रिये ४ का
लिकापीठनिलयेमांसास्थिशोणितप्रिये लेलिह्यमानजि
ह्वाभिर्नमस्तेतारिणीप्रिये ५ प्रचंडचंडिकेदेविशिवाश

तनिनादिनि चिताधूलिविलुप्तांगे नमस्तेचंडचर्चिते ६
मातर्देवि नमस्तेस्तु वरदे पापनाशिनि चिताधूमासिते
नित्यं पाहि मां तारिणि प्रिये ७ सदा संतप्तहृदये पुनःपुनः
विलोकिनि देहि मे सकलान् कामान् सर्वदेवस्वरूपिणि ८
शिवास्तोत्रमिदं वत्स वलिंदत्वा पठेत् सकृत् शिवत्तस्स भवे
त्सर्वाभीष्टान्कामानवाप्नुयात् एतदज्ञानतो मूढाये जपं
ति विमोहिताः तेषां निंदादिदोषेण देवताशापमाप्नुयात् ९

श्री॰ शिवारूपपरेदेविकामकालिनमोस्तुते उल्कामुखिललजि २
ह्वेघोररावेस्रगालिनि ११ श्मशानवासिनिप्रेतेशवमांस
प्रियेनधे आरण्यचारिणिशिवेफेरेजंबुकरूपिणि १२
नमोस्तुतेमहामायेजगत्तारिणिकालिकि मातंगिकुकु
टेरौद्रेकालकालिनमोस्तुते १३ सर्वसिद्धिप्रदेभीमेभयंक
रिभयावहे प्रसन्नाभवदेवेशिममभक्तस्यकालिके १४
संसारतारिणिजयेजयसर्वशुभंकरि विस्रस्तचिकुरेचंडि

चामुंडे मुंडमालिनि १५ संहारकारिणि क्रुद्धे सर्वसिद्धिं
प्रयच्छ मे दुर्गे किरातशबरि प्रेतासनगते भये १६ अ
नुग्रहं कुरु सदा कृपया मां विलोकय राज्यं प्रयच्छ वि
कटे वित्तमायुस्सुतान्स्त्रिय १७ शिवाबलिविधानेन प्र
सन्ना भव भैरवि नमस्तेस्तु नमस्तेस्तु नमस्तेस्तु नमो नमः
१८ इत्येतैरष्टभिः श्लोकैः शिवास्तोत्रमुदीरयेत् एहि ए
हि जगन्मातर्जननि रक्ष रक्ष इमं सामिषान्नबलिं

श्री·

स्त्रिंह्रिंदेह्रिंदेह्रिशत्रुक्षयंकुरुकुरुहंहूंह्रींह्रींॐफट्स्वाहा ४
इत्यनेनमंत्रेणबलिमादौदद्यात् इतिशिवाबलिप्रका
रःसमाप्तः ॥

५